# महिषासुरवधः

## लिट् लकार, लृङ् लकार

पुरा असुराणां राज्ये महिषासुरः जज्ञे | अमरत्वम् इच्छुः सः बहुकालं तपश्चरन् ब्रह्मणः वरं प्राप्य - "योषिता एव मरणं प्राप्नोषि" - इति, बलिष्ठः सः उद्धतः बभूव | तस्य दौर्जन्यं प्रतिरोद्धुं त्रैलोके कोऽपि समर्थः न बभूव| पृथिवीं जिगाय महिषासुरः देवलोकम् अमरावतीम् अभिललाष | देवासुराणां घोरः युद्धः आरेभे | दीर्घकालान्तरे महिषासुरः अमरावतीं जहार|

शक्रादयः देवा: विष्णुं शरणं जग्मुः | विधातुः वरेण महिषासुरं संहर्तुं स्त्रीशक्तिः आवश्यकी आसीत् | ब्रह्मा विष्णुः महेश्वरः च त्रयोऽपि देवैः सह विचारञ्चक्रुः | ततः सर्वेषां देवानां शक्तिम् एकीकृत्य प्रत्यक्षी बभूव एका महाशक्तिः| कोटि सूर्याणां तेजोपुञ्जाम् अष्टादशदोर्भियुक्ताम् अतीव लावण्यवतीं करुणार्द्रलोचनां जगन्मातरं च देवीं सर्वे ददृशुः | नम्राः बभूवुः तां पूजाञ्चक्रुः | महिषासुरात् अस्मान् त्रायस्व इति प्रार्थयाञ्चक्रुः | सर्वे देवाः तस्यै स्वीयानि आयुधानि विविधानि ददुः | विष्णोः सुदर्शनचक्रं महेश्वरात् त्रिशूलं वरुणात् शङ्खम् , अन्येभ्यः देवेभ्यः खड्गं, खट्वाङ्गं, गदादीनि विविधानि शस्त्राणि देवी प्राप | सा सर्वान् आश्वासयाञ्चकार ततः प्रस्थानं च चकार |

सिंहारूढा देवी महिषासुरस्य राज्यं प्रतिजगाम | विन्ध्याचलम् अध्युवास| तस्य भटाः महिषासुरं तस्याः विषये ऊचुः | श्रुत्वा तां परिणेतुम् इच्छुकः सः तां प्रति सेनान्यं प्रस्तावेन पिप्रेषे | "युद्धे मां यदि अजेष्यत् तर्हि वृणोमि" इत्युवाच देवी | पुनरपि घोरयुद्धम् आरेभे | संग्रामे महिषासुरेण

प्रेषिताः धूम्रलोचन शुम्भ निशुम्भ चण्डमुण्ड रक्तबीजादि नैके असुराः देव्या संहृताः | एतां वार्ताम् आकर्ण्य चुकोप महिषासुरः | स्वयं देव्या सह रणाङ्गणे युयुधे | भीषणं युद्धं बभूव | मायावी सः असुरः विविधैः रूपैः देवीम् आक्रमणञ्चकार | सा अपि अस्त्रशस्त्रैः तं प्रतिबद्धञ्चकार | अन्ते महिषासुररूपेण यदा सः आजगाम तदा देवी सुदर्शनचक्रेण तं सञ्जहार | तथा "महिषासुरमर्दिनी" इति जगद्विख्याता बभूव |

देवाः सर्वे ननन्दुः जगन्मातरं प्रणमुः च | आपत्काले यः कोऽपि मां भजते तम् अहम् उद्धरामि- इति आश्वासनं दत्त्वा देवी अन्तर्धाना बभूव |

By

Sudha Karnad and Sudha Ullal